योगवासिष्ठः/प्रकरणम् ३ (उत्पत्तिप्रकरणम्)/सर्गः ०२२

अज्ञातलेखकः

द्वाविंशः सर्गः २२

श्रीदेव्युवाच ।

यथा स्वप्नपरिज्ञानात्स्वप्नदेहो न वास्तवः ।

अनुभूतोऽप्ययं तद्वद्वासनातानवादसन् ।। १

यथा स्वप्नपरिज्ञानात्स्वप्नदेहः प्रशाम्यति ।

वासनातानवात्तद्वज्जाग्रद्देहोऽपि शाम्यति ।। २

स्वप्नसंकल्पदेहान्ते देहोऽयं चेत्यते यथा ।

तथा जाग्रद्भावनान्ते उदेत्येवातिवाहिकः ।। ३

स्वप्ने निर्वासनाबीजे यथोदेति सुषुप्तता ।

जाग्रत्यवासनाबीजे तथोदेति विमुक्तता ।। ४

येयं तु जीवन्मुक्तानां वासना सा न वासना ।

शुद्धसत्त्वाभिधानं तत्सत्तासामान्यमुच्यते ।। ५

या सुप्तवासना निद्रा सा सुषुप्तिरिति स्मृता ।

यत्सुप्तवासनं जाग्रद्घनोऽसौ मोह उच्यते ।। ६

प्रक्षीणवासना निद्रा तुर्यशब्देन कथ्यते ।

जाग्रत्यपि भवत्येव विदिते परमे पदे ।। ७

प्रक्षीणवासना येह जीवतां जीवनस्थितिः ।

अमुक्तैरपरिज्ञाता सा जीवन्मुक्ततोच्यते ।। ८

शुद्धसत्त्वानुपतितं चेतः प्रतनुवासनम् ।

आतिवाहिकतामेति हिमं तापादिवाम्बुताम् ।। ९

आतिवाहिकतां यातं बुद्धं चित्तान्तरैर्मनः ।
सर्गजन्मान्तरगतैः सिद्धैर्मिलति नेतरत् ।। १०
यदा तेऽयमहंभावः स्वभ्यासाच्छान्तिमेष्यति ।
तदोदेष्यति ते स्फारादृश्यान्ता बोधता स्वयम् ।। ११
आतिवाहिकताज्ञानं स्थितिमेष्यति शाश्वतीम् ।
यदा तदा ह्यसंकल्पाँल्लोकान्द्रक्ष्यसि पावनान् ।। १२
वासनातानवे तस्मात्कुरु यत्नमनिन्दिते ।
तस्मिन्प्रौढिमुपायाते जीवन्मुक्ता भविष्यसि ।। १३
यावन्न पूरितस्त्वेष शीतलो बोधचन्द्रमाः ।
तावद्देहमवस्थाप्य लोकान्तरमवेक्ष्यताम् ।। १४
मांसदेहो मांसदेहेनैव संश्लेषमेष्यति ।
नतु चित्तशरीरेण व्यवहारेषु कर्मसु ।। १५
यथानुभव मे वैतद्यथास्थितमुदाहृतम् ।
आबालसिद्धसंसिद्धं न नाम वरशापवत् ।। १६
अवबोधघनाभ्यासाद्देहस्यास्यैव जायते ।
संसारवासनाकार्श्ये नूनं चित्तशरीरता ।। १७
उदेष्यन्ती च सैवात्र केनचिन्नोपलक्ष्यते ।
केवलं तु जनैर्देहो म्रियमाणोऽवलोक्यते ।। १८
देहस्त्वयं न म्रियते न च जीवति किंच ते ।
के किल स्वप्नसंकल्पभ्रान्तौ मरणजीविते ।। १९
जीवितं मरणं चैव संकल्पपुरुषे यथा ।
असत्यमेव भात्येव तस्मिन्पुत्रि शरीरके ।। २०
लीलोवाच ।
तदेतदुपदिष्टं मे ज्ञानं देवि त्वयाऽमलम् ।
यस्मिञ्श्रुतिगते शान्तिमेति दृश्यविषूचिका ।। २१
अत्रोपकुरु मे ब्रूहि कोऽभ्यासः कीदृशोऽथवा ।

स कथं पोषमायाति पुष्टे तस्मिंश्च किं भवेत् ।। २२

श्रीदेव्युवाच ।

यद्येन क्रियते किंचिद्येन येन यदा यदा ।

विनाभ्यासेन तन्नेह सिद्धिमेति कदाचन ।। २३

तच्चिन्तनं तत्कथनमन्योन्यं तत्प्रबोधनम् ।

एतदेकपरत्वं च तदभ्यासं विदुर्बुधाः ।। २४

ये विरक्ता महात्मानो भोगभावनतानवम् ।

भावयन्त्यभवायान्तर्भव्या भुवि जयन्ति ते ।। २५

उदितौदार्यसौन्दर्यवैराग्यरसरञ्जिता ।

आनन्दस्पन्दिनी येषां मतिस्तेऽभ्यासिनः परे ।। २६

अत्यन्ताभावसंपत्तौ ज्ञातृज्ञेयस्य वस्तुनः ।

युक्त्या शास्त्रैर्यतन्ते ये ते ब्रह्माभ्यासिनः स्थिताः ।। २७

सर्गादावेव नोत्पन्नं दृश्यं नास्त्येव तत्सदा ।

इदं जगदहं चेति बोधाभ्यास उदाहृतः ।। २८

दृश्यासंभवबोधेन रागद्वेषादितानवे ।

रतिर्बलोदिता यासौ ब्रह्माभ्यास उदाहृतः ।। २९

दृश्यासंभवबोधेन विना द्वेषादितानवम् ।

तप इत्युच्यते तस्मान्न ज्ञानं तच्च दुःखतत् ।। ३०

दृश्यासंभवबोधो हि ज्ञानं ज्ञेयं च कथ्यते ।

तदभ्यासेन निर्वाणमित्यभ्यासो महोदयः ।। ३१

भवबहुलनिशानितान्तनिद्रा-

सततविवेकविबोधवारिसेकैः ।

प्रगलति हिमशीतलैरशेषा

शरदि महामिहिकेव चेतसीति ।। ३२

इत्युक्तवत्यथ मुनौ दिवसो जगाम

सायंतनाय विधयेऽस्तमिनो जगाम ।

स्नातुं सभा कृतनमस्करणा जगाम

श्यामाक्षये रविकरैश्च सहाजगाम ।। ३३

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये उत्पत्तिप्रकरणे विज्ञानाभ्यासवर्णनं नाम द्वाविंशः सर्गः ।। २२ ।।

चतुर्थो दिवसः ।